# 0109

Total No. of Questions - **16**
Total No. of Printed Pages - **5**

**Regd. No.**

## Part - II

# SANSKRIT, Paper - I

**(Second Language)**

**MODEL QUESTION PAPER (FOR IPE 2020-21 ONLY)**

***Time :* 3 Hours** ***Max. Marks :* 100**

**Note:**

1. All questions should be attempted.
2. Question Nos. 1, 2 & 3 should be answered in the medium of instructions of the candidate.
3. The remaining questions should be answered in Sanskrit (Devnagari Script) only.
4. The bits of a question should be attempted together.

**सूचना :-**

1. सर्वे प्रश्नाः समाधेयाः ।
2. प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये प्रश्नाः संस्कृतभाषायामेव (देवनागरी लिप्या) समाधेयाः ।
3. अंशयुक्तस्य प्रश्नस्य अन्तर्गतांशाः एकत्रैव समाधेयाः ।

**I. एकं श्लोकं पूरयित्वा तस्य भावं लिखत ।** **1×6=6**

1. कुसुमस्तबकस्येव .................................... वा ॥
2. श्रोत्रं .................................... चन्दनेन ॥
3. अज्ञः .................................... रञ्जयति ॥

**II. एकं निबन्धप्रश्नं समाधत्त ।** **1×6=6**

1. रामस्य वनवासं वर्णयत ।
2. नारदतुम्बुरौ उभयोः तारतम्यं कथं ज्ञातवन्तौ ?
3. रामः कः ? सः किमर्थं चित्रकूटम् अगच्छत् ? तत्र किमभवत् ?

Turn Over

**III. एकं निबन्धप्रश्नं समाधत्त ।** **1×6=6**

1. दयालोः नागार्जुनस्य दानशीलताम् उपवर्णयत ।
2. शिबिचक्रवर्तिनः भूतदयां विवृणुत ।
3. वासवानलौ शिबिचक्रवर्तिनं कथं परीक्षितवन्तौ ?

**IV. चतुर्णां प्रश्नानां समाधानानि लिखत ।** **4×2=8**

1. वणिजः पत्नी का ? तयोः पुत्रस्य नाम किम् ?
2. हीरालालस्य माता कति रोटिकाः निर्मितवती ?
3. पेटिका कैः पूरिता आसीत् ?
4. अब्दुल् कलामः छात्राणां मनः विकासयितुं कं कं अशिक्षयत् ?
5. निपुणः चेत् वणिक् किं कृत्वा सुखी भवति ?
6. हीरालाले परिवर्तने आगते सः किमकरोत् ?
7. एकदा नीलाम्बा कां दृष्टवती ?
8. अब्दुल् कलामः कैः पुरस्कारैः सम्मानितः ।

**V. द्वयोः ससन्दर्भां व्याख्यां लिखत ।** **2×3=6**

1. पूर्वं दत्तवरा देवी वरमेनमयाचत ।
2. रक्षसां निहतान्यासन् सहस्राणि चतुर्दश ।
3. ततो विहाय मां गत्वा वैकुण्ठं पृच्छतं युवाम् ।
4. स्थाणवोऽङ्कुरिता येन प्रद्रुता अभवन् शिलाः ।
5. नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।

**VI. द्वयोः ससन्दर्भां व्याख्यां लिखत ।** **2×3=6**

1. राजन् बुभुक्षा मामत्यन्तं पीडयति ।
2. सत्यं दयालुरेवासि ।
3. किं त्वं साम्प्रतं प्रजापतिं जेतुमुद्यतः ?
4. न कोऽप्यर्थी मत्तो विमुखो याति?
5. ''आयुष्मन्, यौवराज्यंप्राप्य किं मृषा हृष्यति'' ?

**VII. द्वौ लघुप्रश्नौ समाधत्त ।** **2×3=6**

1. किं कुर्वन् पुत्रः भवति ?
2. भरतः रामं किमिति वचोऽब्रवीत् ?
3. विष्णुः नारदतुम्बुरौ कं प्रति गन्तुं आज्ञप्तवान् ?
4. मनसः रसायनानि कानि ?
5. महीपतिः दशरथः किं कर्तुम् ऐच्छत् ?

**VIII. द्वौ लघुप्रश्नौ समाधत्त ।** **2×3=6**

1. राज्यलोभः कम् अतिवर्तते ?
2. देवकार्याय भगवान् कुत्र यास्यति ?
3. राजा विहगोत्तमं श्येनं किमिति अब्रवीत् ?
4. जगदीशः कस्मिन् मनः अधात् ?
5. मन्त्री नागार्जुनः कीदृशः ?

**IX. एकेन पदेन समाधत्त ।** **5×1=5**

1. तरवः कैः नम्राः भवन्ति ?
2. भरतः कुत्र राज्यमकरोत् ?
3. सुरगायनौ कौ ?
4. प्राणिनां परं सुखदा का ?
5. अद्यापि ग्रामे कस्याः सुगुणकीर्तनं विदधते ?

**X. एकेन पदेन समाधत्त ।** **5×1=5**

1. चिरायुः कं यौवराज्ये अभिषिक्तवान् ?
2. कः दुर्जयः ?
3. नभस्तः का पपात ?
4. जगदीशः किं शास्त्रं प्रति आकृष्टः अभवत् ?
5. कः राजानम् आत्मानं च विजरौ चिरजीवितौ अकरोत् ?

Turn Over

**XI. संवित्परीक्षा - अधोनिर्दिष्ट कथां पठित्वा प्रश्नान् समाधत्त । 5×1=5**

पुरा धारानगर्यां कश्चित् कर्षकः एकाम् अद्भुतां कुक्कुटीम् अपालयत्। सा कुक्कुटी प्रतिदिनं एकैकं सुवर्णमयम् अण्डं ददाति स्म । तेन सः कर्षकः अतीव धनवान् अजायत । प्रतिदिनं सुवर्णं प्राप्नुवतः अपि तस्य लोभः अतीव अवर्धत । एकदा सः अचिन्तयत् दिने दिने स्वल्पमात्रस्य सुवर्णस्य प्राप्त्या प्रयोजनं नास्ति । अतः कुक्कुट्याः उदरात् सर्वमपि सुवर्णम् एकदैव ग्रहीष्यामि । तथा निश्चित्य कर्षकः कुक्कुटीं हत्वा तस्याः उदरम् अपाटयत् । तस्मिन् तु एकम् अण्डम् अपि न आसीत्। कर्षकस्य अतिलोभेन स्वर्णदायिनी कुक्कुटी विनष्टा ।

**नीतिः**- अतिलोभात् जनः विनश्यति ।

1. कर्षकः काम् अपालयत् ?
2. कुक्कुटी प्रतिदिनं किं ददाति स्म ?
3. तथा निश्चित्य कर्षकः किम् अकरोत् ?
4. केन कुक्कुटी विनष्टा ?
5. अस्याः कथायाः का नीतिः ?

**XII. चत्वारि सन्धिनामनिर्देशसहितं विघटयत । 4×2=8**

| | | | |
|---|---|---|---|
| 1. शुभाङ्गः | 2. नरेन्द्रः | 3. ममैव | 4. प्रत्यहम् |
| 5. हरये | 6. उदरेऽर्भकम् | 7. वाणीशः | 8. गुणोत्तमः |
| 9. परमैश्वर्यम् | 10. प्रत्यागमनम् | 11. गायकः | 12. केऽपि |

**XIII. चत्वारि सन्धिनामनिर्देशसहितं सन्धत्त । 4×2=8**

| | | |
|---|---|---|
| 1. गज + आननः | 2. परम + ईशः | 3. तथा + एव |
| 4. इति + अन्वयः | 5. गुरो + ए | 6. गते + अपि |
| 7. साधु + ऊचुः | 8. महा + उत्सवः | 9. नव + औषधम् |
| 10. सु + आगतम् | 11. तौ + अत्र | 12. भानो + अत्र |

**XIV. द्वयोः शब्दयोः अन्त-लिङ्ग-वचनमात्रनिर्देशसहितं रूपाणि लिखत । 2×4=8**

| | | | |
|---|---|---|---|
| 1. कवि | 2. सीता | 3. मधु | 4. युष्मद् |

**XV. द्वयोः धात्वोः निर्दिष्टानि लकाररूपाणि लिखित ।** **2×3=6**

1. पठति 2. अभवत् 3. लिखेत् 4. वन्दताम्

**XVI. संस्कृतभाषया अनुवदत ।** **5×1=5**

1. Let your father be your God.
2. Dharma protects when protected.
3. Excellence in action is Yoga.
4. Speak truth.
5. Boy studies Sanskrit.